स एकदा जातकलक्षणज्ञा-
नाहूय सर्व्वान् द्विजमुख्यवर्गान् ।
कुतूहलेनापि निविष्टचेताः
पप्रच्छ तस्या जनने विचारम् ॥*॥

अथ तं प्रावदत् कोऽपि बहुज्ञो द्विजसत्तमः ।
एका सीमन्तिनी मान्या कन्या तव महीपते॥
अथान्योऽपि द्विजः प्राह धैर्य्यवानतिशङ्कितः ।
एषा चतुर्द्दशे वर्षे वैधव्यं प्रतिपत्स्यति ॥
इत्याकर्ण्य वचस्तस्य वज्रनिर्घातनिष्ठुरम् ।
मुहूर्त्तमभवद्राजा चिन्ताव्याकुलमानसः ॥
सापि सीमन्तिनी बाला क्रमेण गतशैशवा ।
वैधव्यमात्मनो भावि सा शुश्राव सखीमुखात्॥
परं निर्व्वेदमापन्ना तदाकर्ण्य शुचिस्मिता ।
याज्ञवल्क्यमुनेः पत्नीं मैत्रेयीं पर्य्यपृच्छत ॥
मातस्त्वच्चरणाम्भोजं प्रपन्नाहं भयाकुला ।
सौभाग्यवर्द्धनं कर्म्म मम संशितुमर्हसि ॥*॥
इति प्रपन्नां नृपतेः कन्यामाह मुनेः सती ।
शरणं व्रज तन्वङ्गि पार्व्वतीं शिवसंयुताम् ॥
सोमवारे शिवं गौरीं पूजयस्व समाहिता ।
उपोषिता वा सुस्नाता विरजाम्बरधारिणी ॥
यतवाङ्निश्चलमतिः पूजां कृत्वा यथोचिताम्।
ब्राह्मणान् भोजयित्वा च शिवं सम्यक् प्रसादय
पापक्षयोऽभिषेकेण साम्राज्यं पीठपूजनात् ।
सौभाग्यमखिलं सौख्यं गन्धमाल्याक्षतार्च्चनात्
धूपदानेन सौगन्ध्यं कान्तिर्दीपप्रदानतः ।
नैवेद्येन महाभोगो लक्ष्मीस्ताम्बूलदानतः ॥
धर्म्मार्थकाममोक्षाणां नमस्कारः प्रसाधनम् ।
अष्टैश्वर्य्यादिसिद्धीनां जप एव हि साधनम् ॥
होमेन सर्व्वकामानां समृद्धिरपि जायते ।
सर्व्वेषामेव देवानां तुष्टिर्ब्राह्मणभोजनात् ॥
इत्थमाराधय शिवं सोमवारे शिवामपि ।
प्राप्ता विपद्भिर्व्वहुभिर्द्दुःखैर्व्वा न विहन्यसे ॥
घोरात् घोरं प्रपन्नापि महाक्लेशं भयानकम् ।
शिवपूजाप्रभावेण तरिष्यति महद्भयम् ॥*॥
इत्थं सीमन्तिनी सम्यक् तन्निशम्य सतीमुखात्
यथौ सापि वरारोहा राजपुत्त्री तथापि च ॥

इत्यादि स्कन्दपुराणे ब्रह्मोत्तरखण्डे सोमवारव्रतमाहात्म्यम् ८ अध्यायः ॥

सोमविक्रयी, [न्] पुं, (सोमं विक्रीणातीति । वि + क्री + णिनिः ।)सोमलतारसविक्रयकर्त्ता। यथा,"पापो हि सोमविक्रयी ।"इति मलमासतत्त्वे आश्वलायनब्राह्मणम् ॥ (एतस्मद्दानादेव दातुः प्रत्यवायो भवति । यथा, मनुः । ३ । १८० ।
"सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् ।
नष्टं देवलके दत्तमप्रतिष्ठन्तु वार्द्धुषौ ॥"

सोमवृक्षः, पुं,(सोमस्येव वृक्षो यस्य ।) कट्फलवृक्षः । इति रत्नमाला ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

सोमशकला, स्त्री, (सोमस्य शकलमिव यत्र ।) शशाण्डुली । इति राजनिर्घण्टः । चन्द्रखण्डविशिष्टा च ॥

सोमसंज्ञं, क्ली, (सोमस्य चन्द्रस्य संज्ञा सज्ञा यस्य कर्पूरम् । इति रत्नमाला ॥

सोमसारः, पुं, (सोमस्येव शुक्लः सारो यस्य ।) श्वेतखदिरः । इति राजनिर्घण्टः ॥

सोमसिद्धान्तः, पुं, बुद्धभेदः । इति जटाधरः ॥ ज्योतिर्ग्रन्थविशेषः॥ कापालिकवेशधारी।यथा, "ततः प्रविशति कापालिकवेशधारी खड्गहस्तः सोमसिद्धान्तः ।" इति श्रीकृष्णमिश्रकृतप्रबोधचन्द्रोदयनाटके ३ अङ्कः ॥ सोमसिद्धान्त इति उमया सह वर्त्तमानः सोमो महादेवस्तद्भाषितसिद्धान्त आगमशास्त्रम् । इति श्रीयुक्तहरिहरतर्कालङ्कारतनुजश्रीरुद्रविनिर्म्मिततट्टीका ॥

सोमसिद्धान्ती,[न्]पुं,सोमसिद्धान्तवेत्ता । सोमसिद्धान्तशब्दादिन्प्रत्ययेन निष्पन्नः ॥

सोमसिन्धुः, पुं, (सोमस्यामृतस्य तदुत्पत्तिस्य वा सिन्धुरिव ।) विष्णुः । इति त्रिकाण्डशेषः ॥

सोमसुत्, त्रि, (सोमं सुनोतीति । सोम + सु ञ् मन्यने + "सोमे सुञः ।" ३ । २ । ९० । इति क्विप् ।) यागे सोमलतारसक्षेपकर्त्ता । इति सिद्धान्तकौमुदी ॥ (यथा, रघुः ।१८।२७।
"तस्यौरसः सोमसुतः सुतोऽभूत्
नेत्रोत्सवः सोम इव द्वितीयः ॥")

सोमसुता, स्त्री, (सोमस्य सुता ।) नर्म्मदानदी। इति राजनिर्घण्टः ॥ बुधे, पुं ॥ ( यथा मार्कण्डेये । १२३ । ११ ।
"पवैचतैनं देवानां गुरुः सोमसुतो बुधः ।
नावैचतैनमादित्यो नार्कसुनुर्न भूमिजः ॥")

सोमसूत्रं, क्ली, (सोमस्य जलस्य सूत्रं निर्गमप्रणालीव ।) प्रणालम् । तत्तु शिवलिङ्गस्य गौरीपट्टजलनिर्गमस्थानम् । यथा,—
"शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु ।
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥"
सोमसूत्रं जलनिःसरणस्थानम् । इति तन्त्रसारे सामान्यपूजापद्धतिः ॥

सोमाख्यं,क्ली.(सोमं सोमलतां आख्याति वर्णेनेति । आ + ख्या + कः ।) रक्तकैरवम् । इति रत्नमाला ॥

सोमाभा,स्त्री,(सोमस्य आभा इव आभा यस्याः।) चन्द्रावली । इति भक्तिरसामृतसिन्धुः ॥

सोमालः, त्रि, (सोमाय अलति पर्य्याप्नोतीति । अल् + अच् ।) कोमलः । इति हेमचन्द्रः ॥

सोमाहः, पुं, ( सोमस्य अहः । समासे टच् । ) सोमवारः । इति ज्योतिषम् ॥

सोमेश्वरः, पुं, (सोमस्य ईश्वरः ।) काश्यां सोमकर्त्तृकप्रतिष्ठितशिवः । यथा,—
"शिवरूपाधिष्ठितस्तु शिवरूपो गिरिः स्मृतः ।
सोमेन तत्र संस्थाप्य स्वनाम्ना लिङ्गमुत्तमम् ॥
वर्षाणान्तु सहस्रं वै स्वशापस्य निवृत्तये ।
ततः क्षयादिनिर्म्मुक्तस्तेजसा च परिप्लुतः ॥
स्वकं तेजोबलंप्राप्य तुष्टाव गिरिजापतिम् ।
सोमेश्वराच्च वरदमाविर्भूतं त्रियम्बकम् ॥"
इति वाराहे सोमेश्वरादिलिङ्गमहिमावमुक्तिक्षेत्रविश्वेश्वरादिमहिमनामाध्यायः ॥ ( पीठस्थानविशेषः । यथा, देवीभागवते ।७।३०।७३।
"सोमेश्वरे वरारोहा प्रभासे पुष्करावती ॥")

सोमोद्भवा, स्त्री, (सोमादुद्भवो यस्याः ।) नर्म्मदानदी । इत्यमरः । १ । १० ।३२॥ ( यथा, रघुः ५ । ५९ ।
तथेत्युपस्पृश्य पयः पवित्रं
सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं
जग्राह तस्मान्निगृहीतशापात् ॥")
सोमजाते, त्रि ॥

सोल्लुण्ठः,पुं, (उल्लुण्ठेन सह वर्त्तमानः ।)सोल्लुण्ठनम् । इति हलायुधः ॥ (वाच्यलिङ्गोऽयमिति केचित् ॥ )

सोल्लुण्ठनं, क्ली, (उल्लुण्ठेन सह वर्त्तमानम् ।) स्तुतिपूर्व्वकदुर्व्वादः । यथा,—
"दुर्व्वादः स्यादुपालम्भस्तत्र यः स्तुतिपूर्व्वकः ।
सोल्लुण्ठनं सनिन्दस्तु यस्तत्र परिभाषणम् ॥"
इति जटाधरः ॥
( वाच्यलिङ्गेऽप्ययमिति केचित् ॥ )

सोल्लुण्ठोक्तिः,स्त्री,(सोल्लुण्ठा उक्तिः।)सव्यङ्गोक्तिः यथा । उपनायकमानेतुं प्रेषितां तदुपभोगलुप्तचन्दनादीन् वापीस्नानव्याजेन गोपयन्तीं दूतीं प्रति सोल्लुण्ठोक्तिरियमिति निःशेषच्युतचन्दनं इति श्लोकव्याख्याने काव्यप्रकाशटीकायां महेश्वरन्यायालङ्कारः ॥

सौकरः, त्रि, (सूकरस्यायमिति । सूकर + अण्।) सूकरसम्बन्धी । (यथा, किराते ।१२।५३।
"स तमाससाद घननील-
मभिमुखमुपस्थितं मुनेः ।
पोत्रनिकषणविभिन्नभुवं
दनुजं दधानमथ सौकरं वपुः ॥")

सौकरिकः, पुं, (सूकरं हन्तीति । सूकर + ठञ्।) व्याधः । सिकारी इति भाषा । इति केचित् ॥ ( यथा, बृहत्संहितायाम् । १५ । २२ ।
"वरुणेशे पाशिकमत्स्यबन्ध-
जलजानि जलचराजीवाः ।
सौकरिकरजकशौण्डिक-
शाकुनिकाश्चापि वर्गेऽस्मिन् ॥"

सौकर्य्यं,क्ली, (सुकरस्य भावः कर्म्म वा । सुकर + ष्यञ् । ) अनायासः । ( यथा, साहित्यदर्पणे । १० । ९८ ।
"सौकर्य्येण च कार्य्यस्य विहतं क्रियते यदि॥"*
सूकरस्य भावः कर्म्म वा । सूकर + ष्यञ् । ) सूकरस्य क्रिया । इति विश्वः ॥

सौक्ष्म्यं, क्ली, सूक्ष्मता । सूक्ष्मस्य भावः इत्यर्थे ष्यञ् ( ष्यञ् ) प्रत्ययेन निष्पन्नम् ॥

सौखसुप्तिकः,त्रि,(सुखसुप्तिं सुखेन शयनं पृच्छतीति । सुखसुप्ति + ठञ् ।) वैतालिकः। यथा,
"वैतालिका बोधकरा अर्थिकाः सौखसुप्तिकाः।"
इति हेमचन्द्रः ॥